# व्यञ्जनवर्णाः

डॉ. सुरेन्द्र कुमार शर्मा

माहेश्वरमतेनाथ व्यञ्जनानि तु संख्यया।
द्विचत्वारिंशदुक्तानि तेषां विश्लेषणं त्विदम्।।1।।

कवर्गादिपवर्गान्ता स्पर्शाख्याः पविंशतिः।
वर्गेषु प्रतिवर्गं ये प प व्यवस्थिताः।।2।।

अन्तःस्थाश्चापि चत्वारः चत्वारश्चोष्मसंज्ञिताः।
अनुस्वारो विसर्गश्च जिह्वामूलीय एव च।।3।।

उपध्मानीयकश्चाथ चत्वारश्च यमाःस्मृताः।
दुःस्पृष्टोऽपि लकारश्च द्विचत्वारिंशदित्यमी।।4।।

कवर्गः कखगघङाः चवर्गश्चछजझञाः।
टवर्गः टठडढणाः तवर्गस्तथदधनाः।।5।।

पवर्गः फफबभमाः अन्तःस्था स्युर्यरलवाः।
उष्माणः शषसहाः स्युः ते निखिले हल् संज्ञिताः।।6।।

अँ इति स्वरशीर्षस्थो बिन्दुरूपेण लिख्यते।
नासिकातः समुच्चार्यो वर्णोऽनुस्वार उच्यते।।7।।

अः इः इति स्वराग्रे तु लेख्यो बिंदुद्वयात्मकः।
हहादिहुहेहो एवम् उच्चार्यस्तु विसर्गकः।।8।।

क ख इति कखाभ्यां प्राक् लेख्यो योऽर्ध विसर्गवत्।
जिह्वामूलीयवर्णोऽर्धं कखवदुच्चार्यते च सः।।9।।

प फ इति पफाभ्यां प्राक् लेख्यो योऽर्धविसर्गवत्।
उपध्मानीयवर्णः स योऽर्धं प फ वदुच्यते।।10।।

हयवरट्लण् इत्यादि हल् सूत्रावधिकं पुनः।
शिवसूत्राणि सर्वाणि व्यञ्जनान्युल्लिखन्ति हि।।11।।

तदनुसृत्य संक्षिप्तःप्रत्याहारेति संज्ञया।
व्यञ्जनान्यपि सूच्यन्ते संज्ञाभिर्हल्झलादिभिः।।12।।

हलः शलो वलो रलो यरः खरश्चरो झरः।
यञो झयः खयो ययो मयश्चयो ङमो यमः।।13।।

झषो जशो भशो बशः झशो झलो यणो हशः।
शरश्छवो वशश्चेति व्यवहारो हलां भवेत्।।14।।

*प्राचार्यचरः,*

*श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*